# श्यामला नवरत्नमालिका स्तवं

**। ध्यानं ।**

कचांचितविपंचिकां कुटिलकुंतलालंकृतां
कुशेशयनिवेशिनीं कुटिलचित्तविद्वेषिणीम् ।
मदालसगतिप्रियां मनसिजारिराज्यश्रियं
मतंगकुलकन्यकां मधुरभाषिणीमाश्रये ॥

कुंदमुकुलाग्रदंतां कुंकुमपंकेन लिप्तकुचभाराम् ।
आनीलनीलदेहामंबामखिलांडनायिकां वंदे ॥

**। अथ स्तोत्रं ।**

ओंकारपंजरशुकीं उपनिषदुद्यानकेलिकलकंठीम् ।
आगमविपिनमयूरीं आर्यामंतर्विभावये गौरीम् ॥ 1

दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां संगीतमातृकां वंदे ॥ 2

श्यामतनुसौकुमार्यां सौंदर्यानंदसंपदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वंदे ॥ 3

नखमुखमुखरितवीणानादरसास्वादनवनवोल्लासम् ।
मुखमंब मोदयतु मां मुक्तातातंकमुग्धहसितं ते ॥ 4

© 2022 Vedam Nadam

सरिगमपधनिरतां तां वीणासंक्रांतकांतहस्तांताम् ।
शांतां मृदुलस्वांतां कुचभरतांतां नमामि शिवकांताम् ॥ 5

अवटुतटघटितचूलीताडिततालीपलाशताटंकाम् ।
वीणावादनवेलाकम्पितशिरसां नमामि मातंगीम् ॥ 6

वीणारवानुषंगं विकचमोदमाधुरीभृंगं ।
करुणापूरतरंगं कलये मातंगकन्यकापांगम् ॥ 7

मणिभंगमेचकांगीं मातंगीं नौमि सिद्धमतंगीम् ।
यौवनवनसारंगीं संगीतांभोरुहानुभवभृंगीम् ॥ 8

मेचकमासेचनकं मिथ्यादृष्टांतमद्ध्यभागं तम् ।
मातस्वस्वरूपं मंगलसंगीतसौरभं वंदे ॥ 9

नवरत्नमाल्यमेतद्रचितं मातंगकन्यकाऽऽभरणम् ।
यः पठति भक्तियुक्तः सभवेत् वागीश्वरस्साक्षात् ॥ 10

प्रपंचपंचीकृतकनिदानपदपांसवे ।
वीणावेणुशुकालापप्रवीणमहसे नमः ॥ 11

॥ इति कालिदासकृत श्यामला नवरत्नमालिका स्तवः संपूर्णम् ॥